अथवा ।
"मुनीचान्तरित: खेट: सवक्रभ: सकलीकृत: ।
आयु:पलमिदं प्राज्ञैर्ज्ञेयं पैण्डादिकत्रये ॥
त्र्यंशोनं शत्रुभस्थस्य विनारमायुष: फलम् ।
अस्तगस्य द्विभागोनं हित्वा शुक्रशनैश्चरौ ॥
एकस्य यदि खेटस्य त्र्यंशार्द्धहानिसम्भव: ।
अधिकैका तदा हानि: कर्त्तव्यात्र विपश्चिता ॥
चक्रार्द्धशोधनं कार्य्यं पूर्व्ववत् सति सम्भवे ।
एवमायु:फलं पैण्डे जीव: प्रोक्ते निसर्गजे ॥
पैण्डं यथागतं सौरेर्भानोर्व्विंशांशवर्ज्जितम् ।
चन्द्रस्य वेदभागाढ्यं भृगोर्२०व्विंशांशसंयुतम् ॥
कुजगुर्व्वोश्चतुर्भागांशोनं ज्ञस्यार्द्धं तत्र शरांशयुक् ।
आयु:फलं निसर्गाख्ये रविकव्योर्यथागतम् ॥
दशांशोनदलं ज्ञस्य जीवस्य विद्शांशकम् ।
दशांशं भूमिपुत्त्रस्य त्रिंशत्यंशं निशापते: ॥
एशभं श्रुतिभिर्भक्तं शनेरायु:फलं भवेत् ।
जीवोक्तं सप्तभागोनं सर्व्वेषामायुष: फलम् ॥
आयु: फलस्य खाभ्राष्टदिगभागेन १०८०० समायुतम् ।
इत्थमायु:फलं खाष्टदशाप्तम् १०८० स्यात् समादिकम् ॥
पैण्डनैसर्ग्यजीवोक्ते भवेदायु: खगाश्रिताम् ।"
अथवा ।
"रवेरायु:फलं त्र्याप्तं त्रिभखांशं दिनादिकम् ।
पैण्डमायुर्भवेदिन्दोर्व्वाणघ्नम्५ द्वादशो१२ द्धृतम् ।
कुजगुर्व्वोश्चतुर्गे नाप्तं बुधस्य पञ्चभिर्द्धृतम् ।
कवे: शैल७हृतं विंशत्याप्तं २० सौरेर्गुणोद्धृतम् ।
विधोरायु:फलं लब्धं खरसै: स्याद्दिनादिकम् ॥
निसर्गे शशिपुत्त्रस्य३ रामघ्नं खयमोद्धृतम् ।
रविकव्योर्गुणनाप्तं कुजस्य खगुणोद्धृतम् ॥
गुरोस्त्रिघ्नं खचन्द्राप्तं१० शनेस्तर्का ६ शनोलितम् ॥"
अथवा ।
"आयु:फलमिनादीनां खाब्धिषसाग ८६४० भागयुक् ।
द्विघ्नं सप्ताप्तमायु: स्याद्दिनाद्यं जीवभाषितम् ॥
विराशिलप्तिकला खखखार्क१२००० हृतात्तनो: ।
तदंशकसमं ज्ञेयमायु: पैण्डादिकत्रये ॥
अंशतुल्यं तनोरायुर्व्वदन्ति बहवो बुधा: ।
केचिद्दशाश्रमं केचित्तस्य यस्याधिपो बली ॥
लग्नस्फुटस्य लिप्ताभिर्हन्यादायुर्द्दुचारिणाम् ।
प्रत्येकं चन्द्रलिप्ताभि २१६००० भजेद्वर्षाधिकं भवेत् ॥
अनेन हीनस्वस्वायुर्लग्ने पापग्रहे सति ।
दृष्टे तु सौम्यखेटेन तस्यार्द्धेन तदा वियुक् ॥
याखानमुत्पलस्यैव दृढन्मातकभाषितम् ।
केचित प्राहुर्लग्नराशिं व्यक्ता लिप्तादिका क्रिया ॥
अन्ये लग्नस्थपापस्य भावोत्थफलनाशितम् ।
पुराणं शोध्यमायुर्यत् तत्षट्याप्तं विशोधयेत् ॥
तत्रापि यदि पापौ तेषु बलिष्ठस्य फलेन तत् ।
अन्ये पृथक्फलेनैव क्रिया कार्य्या विचक्षणै: ॥
पापेऽपि लग्ने अग्नेशे न कर्त्तव्या त्वियं क्रिया ।
अंशायुषि न कार्य्यैवं हानि: प्राज्ञै: कथञ्चन ॥
लग्नस्य वीर्य्यादंशोत्थं पैण्डं भानोर्व्वलाधिकात् ।
निसर्गोऽयं विधोर्व्वीर्य्यादायु: साध्यं विचक्षणै: ॥
त्रयश्चेद्बलहीना: स्युर्जीवोक्तं साधयेत्तदा ।
लग्ने द्वौ लग्नभान्वोश्च सूर्य्येन्द्वो: समवीर्य्ययो: ॥
तदायुषो यदैक्यार्द्धं तदुक्तं श्रीधरादिभि: ।
नाक्षत्रसावनादायु: पृथक्शून्यनगांशकै: ॥
साष्टसूर्य्यांशकै१२८र्हीनं सौरं वर्षादिकं भवेत् ॥
पथ्याशिन: सधर्म्मा ये सच्छीलाढ्या जितेन्द्रिया: ।
गुरुदेवद्विजे भक्तास्तेषामेवायुरीरितम् ॥
ये पापा लुब्धकृपणा देवब्राह्मणनिन्दका: ।
बन्धुगुर्व्वङ्गनासक्तास्तेषां मृत्युरकालज: ॥"
इति तोषण्यामायुर्दायाध्याय: ॥

परमायुष:, पुं, (परमं आयुर्यस्य । पृषोदरादित्वादच् । दीर्घकालजीवित्वादस्य तथात्वम् ।) असनवृक्ष: । इति शब्दचन्द्रिका ॥

परमार्थ:, पुं, (परम: श्रेष्ठ: अर्थ: ।) उत्कृष्टवस्तु । यथार्थ: । यथा,—
"प्रपञ्चो यदि वर्त्तेत निवर्त्तेत न संशय: ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थत: ॥"
इति माण्डूक्यवार्त्तिकम् ॥
(तथा च कुमारे । ५ । ७५ ।
"उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ॥"
परम: मुख्य: अर्थ: प्रयोजनमिति विग्रहे । मोक्ष: । सुखम् । सुखभोग: दु:खाभाव: ॥ इति न्यायदर्शनम् ॥)

परमार्हत:, पुं, (परम: अर्हन् देवता उपास्यतया अस्त्यस्य । परमार्हत् + अच् ।) जैनराजर्षिविशेष: । इति हेमचन्द्र: ॥

परम्मृत्यु:, पुं, परेभ्यो मृत्युरस्य । (रोगादिना मृत्योरभावात् अस्य तथात्वम् ।) काक: । इति त्रिकाण्डशेष: ॥

परमेश्वर:, पुं, (परमश्चासौ ईश्वरश्चेति ।) शिव: । इति हलायुध: ॥ (यथा, महालिङ्गार्च्चनतन्त्रे शिवशतनाम प्रकरणे,—
"सहस्रारे महापद्मे त्रिकोणनिलयान्तरे ।
विन्दुरूपे महेशानि ! परमेश्वर ईरित: ॥")
विष्णु: । यथा,—
"इदन्तु द्वादशं प्रोक्तं पत्रं वै केशवस्य हि ।
द्वादशारं तथा चक्रं यन्नाभिद्विभुजं तथा ॥
त्रिव्यूहस्त्वेकमूर्त्तिश्च तथोक्त: परमेश्वर: ।"
इति वामने ५८ अध्याय: ॥
(स्त्रियां ङीप् । दुर्गा । यथा,—
देवीभागवते । ७ । ३० । ७० ।
"देवकी मथुरायान्तु पाताले परमेश्वरी ॥")

परमेष्ठिनी, स्त्री, (परमेष्ठिन् + ङीप् ।) ब्राह्मी । इति राजनिर्घण्ट: ॥ वामनहाटी इति भाषा ॥ परमेष्ठिन: शक्तिश्च ॥

परमेष्ठी, [न्] पुं, (परमे व्योम्नि चिदाकाशे ब्रह्मपदे वा तिष्ठतीति । स्थागति निवृत्तौ "परमे किन् ।" उणां । ४ । १० । इति इनि: स च कित् । "हलदन्तात् सप्तम्या: संज्ञायाम् ।" ६ । ३ । ९ । इत्यलुक् "स्थास्थिन् स्थृणाम् । इति षत्वम् । परमे स्थानेऽनावृत्तलक्षणे तिष्ठतीति कुल्लूकभट्ट: ॥) ब्रह्मा । इत्यमर: । १ । १ । १६ । (यथा, मनु: । १।८० ।
"मन्वन्तराण्यसंख्यानि सर्ग: संहार एव च ।
क्रीड़न्निवैतत् कुरुते परमेष्ठी पुन: पुन: ॥"
विष्णु: । यथा, महाभारते । १३ । १४९ । ५८ ।
"क्रतु: सुदर्शन: काल: परमेष्ठी परिग्रह: ॥"
महादेव: । यथा, महाभारते । ३ । ३७ । ५८ ।
"क्रियतां दर्शने यत्नो देवस्य परमेष्ठिन: ।
दर्शनात्तस्य कौन्तेय ! संसिद्ध: सर्व्वमेष्यसि ॥")
जिन: । इति हेमचन्द्र: ॥ शालग्रामविशेष: । यथा,—
"परमेष्ठी च शुक्लाभ: पद्मचक्रसमन्वित: ।
चित्राकृतिस्तथा पृष्ठे शुषिरञ्चातिपुष्कलम् ॥
परमेष्ठी लोहिताभश्चक्रमेकं तथा युतम् ।
बिम्बाकृतिस्तथा रेखा शुषिरञ्चातिपुष्कलम् ॥"
इति ब्रह्मपुराणम् ॥
"परमेष्ठी च शुक्लाभश्चक्रपद्मसमन्वित: ।
स वर्त्तुलस्तथा पीत: पृष्ठे च शुषिरं ध्रुवम् ॥"
इति पुराणसंग्रह: ॥
"परमेष्ठी तु रक्ताभश्चक्रपद्मसमन्वित: ।
द्विधाकृतस्तथा पृष्ठे शुषिरञ्चापि वर्त्तुलम् ॥
पीतवर्णयुतो वापि भुक्तिमुक्तिवरप्रद: ॥"
इति वैश्वानरसंहिता ॥ * ॥
गुरुविशेष: । यथा,—
"आदौ सर्व्वत्र देवेशि ! मन्त्रद: परमो गुरु: ।
परापरगुरुस्त्वं हि परमेष्ठी त्वहं गुरु: ॥"
इति बृहन्नीलतन्त्रे २ पटल: ॥
मन्त्रदाता गुरु: प्रोक्तो मन्त्रस्तु परमो गुरु: ।
परापरगुरुस्त्वं हि परमेष्ठिगुरुस्त्वहम् ॥"
इति तन्त्रान्तरम् ॥
(अजमीढ़पुत्त्र: । यथा, महाभारते । १।९४।३१ ।
"अजमीढ़ो वरस्तेषां तस्मिन् वंश: प्रतिष्ठित: ।
षट् पुत्त्रान् सोऽप्यजनयत् तिसृषु स्त्रीषु भारत ! ।
ऋक्षं धूमिन्यथो नीली दुष्मन्तपरमेष्ठिनौ ॥"
परमस्थानस्थिते वाच्यलिङ्ग: । यथा, मार्कण्डेये । ७६ । २ ।
"अन्यजन्मनि जातोऽसौ चक्षुष: परमेष्ठिन: ।
चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि द्विज ! ॥")

परम्पर:, पुं, (परं पिपर्त्तीति । पृ लि पूर्त्तौ + अच् । "तत्पुरुषे कृतीति" अलुक् ।) प्रपौत्त्रादि: । मृगभेद: । इति हेमचन्द्र: ॥ प्रपौत्त्रतनय: । इति मेदिनी ॥

परम्परा, स्त्री, अन्वय: । (यथा, कुमारे । ६।४९ ।
"गगनादवतीर्णा सा यथा वृद्धपुर:सरा ।
तोयान्तर्भास्करालीव रेजे मुनिपरम्परा ॥")
सन्तान: । वध: । हिंसा । इति हेमचन्द्र: ॥ परीपाटी । अनुक्रम: । इति शब्दरत्नावली ॥ यथा,
"इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥